NCERT
National Council Of Educational Research And Training

NCERT Solutions for Class 10 Sanskrit (Shemushi): Chapter 11-प्राणेभ्योऽपि प्रियः सुहृद्

IndCareer Schools

indCareer indCareer indCareer

# NCERT Solutions for Class 10 Sanskrit (Shemushi): Chapter 11-प्राणेभ्योऽपि प्रियः सुहृद्

Class 10: Sanskrit (Shemushi) Chapter 11 solutions. Complete Class 10 Sanskrit (Shemushi) Chapter 11 Notes.

## NCERT Solutions for Class 10 Sanskrit (Shemushi): Chapter 11-प्राणेभ्योऽपि प्रियः सुहृद्

NCERT 10th Sanskrit (Shemushi) Chapter 11, class 10 Sanskrit (Shemushi) Chapter 11 solutions

**प्रश्न 1.**

https://www.indcareer.com/schools/ncert-solutions-for-class-10-sanskrit-shemushi-chapter-11-pranebhyopi-priy-surhad/

एकपदेन उत्तरं लिखत

(क) कः चन्दनदासं द्रष्टुम् इच्छति?

(ख) चन्दनदासस्य वणिज्या कीदृशी आसीत्?

(ग) किंम् दोषम् उत्पादयति?

(घ) चाणक्यः कं द्रष्टुम् इच्छति?

(ङ) कः शङ्कनीयः भवति?

उत्तर:

(क) चाणक्यः

(ख) अखण्डिता

(ग) रात्रोः प्रच्छादनम्

(घ) चन्दनदासम्

(ङ) अत्यादरः

**प्रश्न 2.**

अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत

(क) चन्दनदासः कस्य गृहजनं स्वगृहे रक्षति स्म?

(ख) तृणानां केन सह विरोधः अस्ति?

(ग) पाठेऽस्मिन् चन्दनदासस्य तुलना केन सह कृता?

(घ) प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियं के इच्छन्ति?

(ङ) कस्य प्रसादेन चन्दनदासस्य वणिज्या अखण्डिता?

उत्तर:

(क) चन्दनदासः अमात्यराक्षसस्य गृहजनं स्वगृहे रक्षति स्म।

(ख) तृणानां अग्निना सह विरोधः अस्ति।

(ग) पाठेऽस्मिन् चन्दनदासस्य तुलना शिविना सह कृता।

(घ) प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियं राजानः इच्छन्ति।

(ङ) आर्यस्य प्रसादेन चन्दनदासस्य वणिज्या अखण्डिता।

**प्रश्न 3.**

स्थूलाक्षरपदानि आधृत्य प्रश्ननिर्माणं कुरुत

(क) शिविना विना इदं दुष्करं कार्य कः कुर्यात्।

(ख) प्राणेभ्योऽपि प्रियः सुहृत्।

(ग) आर्यस्य प्रसादेन मे वणिज्या अखण्डिता।

(घ) प्रीताभ्यः प्रकृतिभ्यः राजानः प्रतिप्रियमिच्छन्ति ।

(ङ) तृणानाम् अग्निना सह विरोधो भवति ।

उत्तर:

(क) केन विना इदं दुष्करं कार्य कः कुर्यात्?

(ख) प्राणेभ्योऽपि प्रियः कः?

(ग) कस्य प्रसादेन में वणिज्या अखण्डिता?

(घ) प्रीताभ्यः प्रकृतिभ्यः के प्रतिप्रियमिच्छन्ति?

(ङ) केषाम् अग्निना सह विरोधो भवति?

**प्रश्न 4.**

यथानिर्देशमुत्तरत

(क) 'अखण्डिता में वणिज्या'-अस्मिन् वाक्ये क्रियापदं किम्?

(ख) पूर्वम् 'अनृतम्' इदानीम् आसीत् इति परस्परविरुद्ध वचने-अस्मात् वाक्यात् 'अधुना' इति पदस्य समानार्थकपदं चित्वा लिखत।

(ग) 'आर्य! किं मे भयं दर्शयसि' अत्र 'आर्य' इति सम्बोधनपदं कस्मै प्रयुक्तम्?

(घ) 'प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः' अस्मिन् वाक्ये कर्तृपदं किम्?

(ङ) तस्मिन् समये आसीदस्मद्गृहे' अस्मिन् वाक्ये विशेष्यपदं किम्?

उत्तर:

(क) अखण्डिता

(ग) चाणक्याय

(ङ) समये

(ख) इदानीम्

(घ) राजानः

प्रश्न 5.

निर्देशानुसारं सन्धिं/सन्धिविच्छेदं कुरुत

| | | | | | | |
|---|---|---|---|---|---|---|
| (क) यथा— | कः | + | अपि | – | कोऽपि |
| | प्राणेभ्यः | + | अपि | — | ........................... |
| | ............... | + | अस्मि | – | सज्जोऽस्मि। |
| | आत्मनः | + | ............... | – | आत्मनोऽधिकारसदृशम्। |
| (ख) यथा— | सत् | + | चित् | – | सच्चित् |
| | शरत् | + | चन्द्रः | – | ........................... |
| | कदाचित् | + | च | — | ........................... |

उत्तर:

| | | | | |
|---|---|---|---|---|
| (क) | प्राणेभ्य: | + अपि | – | **प्राणेभ्योऽपि।** |
| | **सज्ज:** | + अस्मि | – | सज्जोऽस्मि। |
| | आत्मन: | + **अधिकारसदृशम्** | – | आत्मनोऽधिकारसदृशम्। |
| (ख) | शरत् | + चन्द्र: | – | **शरच्चन्द्र:।** |
| | कदाचित् | + च | – | **कदाचिच्च।** |



प्रश्न **6.**

कोष्ठकेषु दत्तयोः पदयोः शुद्धं विकल्पं विचित्य रिक्तस्थानानि पूरयत

(क) ……………… विना इदं दुष्करं कः कुर्यात् । (चन्दनदासस्य/चन्दनदासेन)

(ख) ……………… इदं वृत्तान्तं निवेदयामि। (गुरवे/गुरोः)

(ग) आर्यस्य ……………… अखण्डिता मे वणिज्या। (प्रसादात्/प्रसादेन)

(घ) अलम् ………………। (कलहेन/कलहात्)

(ङ) वीरः …………. बालं रक्षति। (सिंहेन/सिंहात्)

(च) ………… भीतः मम भ्राता सोपानात् अपतत्। (कुक्कुरेण/कुक्कुरात्)

(छ) छात्रः …………….. प्रश्नं पृच्छति। (आचार्यम्/आचार्येण)

उत्तर:

(क) चन्दनदासेन विना इदं दुष्कार कः कुर्यात्?

(ख) गुरवे इदं वृत्तान्तं निवेदयामि।

(ग) आर्यस्य प्रसादेन अखण्डिता मे वणिज्या।

(घ) अलम् कलहेन।

(ङ) वीरः सिंहात् बालं रक्षति।

(च) कुक्कुरात् भीतः मम भ्राता सोपानात् अपतत्।

(छ) छात्रः आचार्यम् प्रश्नं पृच्छति।

**प्रश्न 7.**

अधोदत्तमञ्जूषातः समुचितपदानि गृहीत्वा विलोमपदानि लिखत

असत्यम् , पश्चात् , गुणः ,आदरः ,तदानीम् ,तत्र

(क) अनादरः — …………………..

(ख) दोषः — …………………..

(ग) पूर्वम् — …………………..

(घ) सत्यम् — …………………..

(ङ) इदानीम् — …………………..

(च) अत्र — …………………..

**उत्तर:**

(क) अनादरः — आदरः

(ख) दोषः — गुणः

(ग) पूर्वम् — पश्चात्

(घ) सत्यम् — असत्यम्

(ङ) इदानीम् — तदानीम्

(च) अत्र — तत्र

प्रश्न 8.

उदाहरणमनुसृत्य अधोलिखितानि पदानि प्रयुज्य पञ्चवाक्यानि रचयत

यथा-निष्क्रम्य-शिक्षिका पुस्तकालयात् निष्क्रम्य कक्षा प्रविशति।

(क) उपसृत्य — …………………..

(ख) प्रविश्य — …………………..

(ग) द्रष्टुम् — …………………..

(घ) इदानीम् — …………………..

(ङ) अत्र — …………………..

उत्तर:

(क) उपसृत्य – शिष्याः गुरुकुलं उपसृत्य वेदान् अपठन्।

(ख) प्रविश्य – सभागारं प्रविश्य छात्राः तूष्णीं तिष्ठन्ति।

(ग) द्रष्टुम् – वयम् ह्यः चलचित्रम् द्रष्टुम् अगच्छाम।

(घ) इदानीम् – इदानीम् भक्ताः ईश्वरं पूजयन्ति।

(ङ) अत्र – अत्र आगत्य कोलाहलः न करणीयः।

**Additional Important Questions and Answers**

पठित-अवबोधनम् |

**I.** पठित-सामाग्र्याम् आधारितम् अवबोधनकार्यम्

अधोलिखितनाट्याशान् पठित्वा प्रश्नान् उत्तरत

चाणक्यः – वत्स! मणिकारश्रेष्ठिनं चन्दनदासमिदानीं द्रष्टुमिच्छामि।

शिष्यः तथेति (निष्क्रम्य चन्दनदासेन सह प्रविश्य) इतः इतः श्रेष्ठिन्! (उभौ परिक्रामतः)।

शिष्यः (उपसृत्य) उपाध्याय! अयं श्रेष्ठी चन्दनदासः।

चन्दनदासः – जयत्वार्यः।

चाणक्यः – श्रेष्ठिन्! स्वागतं ते। अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभा:?

चन्दनदासः – (आत्मगतम्) अत्यादरः शङ्कनीयः। (प्रकाशम्) अथ किम्। आर्यस्य प्रसादेन अखण्डिता मे वाणिज्या।

चाणक्यः – भो श्रेष्ठिन्! प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः।

चन्दनदासः – आज्ञापयतु आर्यः, किं कियत् च अस्मज्जनादिष्यते इति।



NCERT Solutions for Class 10 Sanskrit (Shemushi): Chapter 11-प्राणेभ्योऽपि प्रियः सुहृद्

प्रश्ना:

**I.** एकपदेन उत्तरत

(i) केन सह शिष्य प्रविशति?

(ii) चन्दनदासम् कः द्रष्टुम् इच्छति?

उत्तर:

(i) चन्दनदासेन

(ii) चाणक्यः

**II.** पूर्णवाक्येन उत्तरत

केषाम् वृद्धिलाभाः प्रचीयन्ते**?**

उत्तर:

संव्यवहाराणां वृद्धिलाभाः प्रचीयन्ते।

**III.** प्रदत्तविकल्पेभ्यो उचितम् उत्तरं चित्वा लिखत

(i) 'इच्छन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(क) प्रीताभ्यः

(ख) प्रकृतिभ्यः

(ग) प्रियम

(घ) राजानः

उत्तर:

(घ) राजानः

**(ii) 'मे वणिज्या' अत्र 'मे' सर्वनामपदं कस्मै प्रयुक्तम्?**

(क) शिष्याय

(ख) चन्दनदासाय

(ग) चाणक्याय

(घ) चाणक्यः

उत्तर:

(ख) चन्दनदासाय

**(iii)** ‘अखण्डिता’ इति पदस्य विशेष्यपदं किम्**?**

(क) आर्यस्य

(ख) मे

(ग) प्रसादेन

(घ) वणिज्या

उत्तर:

(घ) वणिज्या

**(iv)** ‘प्रविश्य’ इति पदस्य विलोमपदं किम्**?**

(क) निष्क्रम्य

(ख) परिक्रामतः

(ग) प्रकाशम्

(घ) उपसृत्य

उत्तर:

(क) निष्क्रम्य

**(ख)** चाणक्यः भो श्रेष्ठिन्**!** चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्। नन्दस्यैव अर्थसम्बन्ध**:** प्रीतिमुत्पादयति। चन्द्रगुप्तस्य तु भवतामपरिक्लेश एव।

चन्दनदासः – (सहर्षम्) आर्य! अनुगृहीतोऽस्मि।

चाणक्यः – भो श्रेष्ठिन् ! स चापरिक्लेशः कथमाविर्भवति इति ननु भवता प्रष्टव्याः स्मः।

चन्दनदासः – आज्ञापयतु आर्यः। चाणक्यः राजनि अविरुद्धवृत्तिर्भव।

चन्दनदासः – आर्य! कः पुनरधन्यो राज्ञो विरुद्ध इति आर्येणावगम्यते?

चाणक्यः – भवानेव तावत् प्रथमम्।

प्रश्ना :

**I.** एकपदेन उत्तरत

(i) कस्य अर्थसम्बन्धः प्रीतिम् उत्पादयति?

(ii) कस्मिन् अविरुद्धवृत्तिः भव।

उत्तर:

(i) नन्दस्य

(ii) राजनि

**II.** पूर्णवाक्येन उत्तरत

इदम् राज्यम् कस्य अस्ति**?**

उत्तर:

इदम् राज्यम् चन्द्रगुप्तस्य अस्ति।

**III.** प्रदत्तविकल्पेभ्यो उचितम् उत्तरम् चित्वा लिखत

**(i)** 'भवान् एव तावत्**……**' अत्र 'भवान्' सर्वनामपदं कस्मै प्रयुक्तम्**?**

(क) चाणक्य

(ख) चाणक्याय

(ग) चन्दनदासः

(घ) चन्दनदासाय

उत्तर:

(घ) चन्दनदासाय

**(ii)** ‘अवगम्यते’ इति पदस्य कः अर्थः**?**

(क) ज्ञायते

(ख) आगम्यते

(ग) दृश्यते

(घ) गम्यन्ते

उत्तर:

(क) ज्ञायते

**(iii)** ‘उत्पादयति’ इति क्रियापदस्य कर्तृपदं किम्**?**

(क) नन्दस्य

(ख) नन्दस्यैव

(ग) अर्थसम्बन्धः

(घ) प्रीतिम्

उत्तर:

(ग) अर्थसम्बन्धः

**(iv)** ‘धन्यः’ इति पदस्य विपरीतार्थकम् पदम् किम्**?**

(क) पुनरधन्यः

(ख) अधन्य

(ग) विरुद्धः

(घ) आर्यः

उत्तर:

(ख) अधन्य

(ग) चन्दनदासः – (कर्णौ पिधाय) शान्तं पापम्, शान्तं पापम्। कीदृशस्तृणानामग्निना सह विरोधः?

चाणक्यः – अयमीदृशो विरोधः यत् त्वमद्यापि राजापथ्यकारिणोऽमात्यराक्षसस्य गृहजनं स्वगृहे रक्षसि ।

चन्दनदासः – आर्य! अलीकमेतत् । केनाप्यनार्येण आर्याय निवेदितम् ।

चाणक्यः भो श्रेष्ठिन् ! अलमाशङ्कया। भीताः पूर्वराजपुरुषाः पौराणामिच्छतामपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति । ततस्तत्प्रच्छादनं दोषमुत्पादयति।

प्रश्नाः

**I.** एकपदेन उत्तरत

(i) अग्निना सह केषाम् विरोध:?

(ii) प्रच्छादनं किम् उत्पादयति?

उत्तर:

(i) तृणानाम्

(ii) दोषम्

**II.** पूर्णवाक्येन उत्तरत

पूर्वराजपुरुषाः किम् कुर्वन्ति**?**

उत्तर:

पूर्वराजपुरुषाः पौराणाम् इच्छताम् अपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति।

**III.** प्रदत्तविकल्पेभ्यो उचितम् उत्तरम् चित्वा लिखत

**(i)** ‘रक्षसि’ इति क्रियापदस्य कर्तृपदं किम्**?**

(क) चाणक्यः

(ख) चन्दनदासः

(ग) त्वम्

(घ) राजा

उत्तर:

(ग) त्वम्

**(ii)** ‘असत्यं’ इति पदस्य समानार्थकम् पदं किम्**?**

(क) अलीकम्

(ख) प्रच्छादनं

(ग) दोषम्

(घ) अपथ्य

उत्तर:

(क) अलीकम्

**(iii)** ‘भीताः’ इति पदस्य विशेष्यपदं किम्**?**

(क) पूर्व

(ख) पूर्वराजपुरूषाः

(ग) राजपुरुषाः

(घ) पौराणाम्

उत्तर:

(ख) पूर्वराजपुरूषाः

**(iv)** ‘त्वम् अद्यापि....।’ अत्र ‘त्वम्’ सर्वनामपदं कस्य कृते प्रयुक्तम्**?**

(क) चन्दनदासस्य

(ख) चन्दनदासाय

(ग) चन्दनदासः

(घ) चाणक्यः

उत्तर:

(क) चन्दनदासस्य

**II.** प्रश्ननिर्माणम्

अधोलिखितकथनेषु स्थूलपदानि आधृत्य प्रश्ननिर्माणं क्रियताम् उत्तराणि

(i) प्राणेभ्योऽपि प्रियः सुहृद्ः भवति।

(ii) संव्यवहाराणां वृद्धिलाभाः प्रचीयन्ते।

(iii) आर्यस्य प्रसादेन मे वणिज्या अखण्डिता।

(iv) तस्मिन् समये अस्मद् गृहे अमात्यराक्षसस्य गृहजनं आसीत्।

(v) नन्दस्य अर्थसम्बन्धः प्रीतिम् उत्पादयति।

(vi) राजपुरुषाः देशान्तरं व्रजन्ति।

प्रश्ना :

(i) केभ्यो प्रियः सुहृद्ः भवति?

(ii) केषाम् वृद्धिलाभाः प्रचीयन्ते?

(iii) आर्यस्य प्रसादेन कस्य वणिज्या अखण्डिता?

(iv) कदा अस्मद गृहे अमात्यराक्षसस्य गृहजनं आसीत्?

(v) कस्य अर्थसम्बन्धः प्रीतिम् उत्पादयति।

(vi) राजपुरुषाः कुत्र व्रजन्ति?

**III.** 'क' अन्वयः

अधोलिखितश्लोकस्य अन्वये रिक्तस्थानानि पूरयत

(i) सुलभेष्वर्थलाभेषु परसंवेदने जने।

क इदं दुष्करं कुर्यादिदानीं शिविना विना।।

अन्वयः-परसंवेदने …(i)……. सुलभेषु इदं …….(ii)…….कर्म जने (iii)……. विना कः इदानीं …….(iv)……… ! उत्तरम्-परसंवेदने अर्थलाभेषु सुलभेषु इदं दुष्करं कर्म जने शिविना विना कः इदानीं कुर्यात्!

**III.** 'ख' भावार्थ

अधोलिखितश्लोकस्य भावार्थं मञ्जूषात: उचितपदानि चित्वा पूरयत

(i) सुलभेष्वर्थलाभेषु परसंवेदने जने।

क इदं दुष्करं कुर्यादिदानीं शिविना विना॥

अन्वयः-यथा प्राचीनकाले नृपः ……..(i)……. शरणागतस्य कपोतस्य प्राणरक्षायै स्वशरीरस्य …(ii)……. अपि कर्तित्वा अयच्छत् तथैव श्रेष्ठी चन्दनदासः राज्ञः पारितोषकं प्रभूतं धनं च ………..(iii)……स्वमित्रस्य ……….(iv)………" अरक्षत्।

उत्तर:

(i) शिवि

(ii) अङ्गानि

(iii) तृणीकृत्य

(iv) परिवारं

**IV.** कथाक्रमसंयोजनम्

घटनाक्रमानुसारं अधोलिखितानि वाक्यानि पुनः लेखनीयानि

(i) आर्यस्य प्रसादेन अखण्डिता मे वणिज्या।

(ii) मणिकारश्रेष्ठिनं चन्दनदासमिदानीं द्रष्टुमिच्छामि।

(iii) प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः।

(iv) ते अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभाः?

(v) तस्मिन् समये आसीदस्मद् गृहे अमात्यराक्षसस्य गृहजन इति।

(vi) त्वम् अद्यापि राजापथ्यकारिणोऽमात्यराक्षसस्य गृहजनं स्वगृहे रक्षसि।

(vii) चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्। नन्दस्यैव अर्थसम्बन्धः प्रीतिमुत्पादयति।

(viii) सन्तमपि गेहे अमात्यराक्षसस्य गृहजनं न समर्पयामि, किं पुनरसन्तम्?

उत्तर:

(i) मणिकारश्रेष्ठिनं चन्दनदासमिदानीं द्रष्टुमिच्छामि।

(ii) ते अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभाः।

(iii) आर्यस्य प्रसादेन अखण्डिता मे वणिज्या।

(iv) प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः।

(v) चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्। नन्दस्यैव अर्थसम्बन्धः प्रीतिमुत्पादयति।

(vi) त्वम् अद्यापि राजापथ्यकारिणोऽमात्यराक्षसस्य गृहजनं स्वगृहे रक्षसि।

(vii) तस्मिन् समये आसीदस्मद् गृहे अमात्यराक्षसस्य गृहजन इति।

(viii) सन्तमपि गेहे अमात्यराक्षसस्य गृहजनं न समर्पयामि, किं पुनरसन्तम्?

**V.** प्रसङ्गानुकूलम् उचितार्थम्

**I.** रेखांकितपदानाम् प्रसङ्गानुसारं शुद्धम् अर्थं चित्वा लिखत

**(i)** सन्तम् अपि गेहे अमात्यराक्षसस्य गृहजनं न समर्पयामि।

(क) सज्जनाः

(ख) सन्तः

(ग) निवसन्तम्

(घ) सज्जनं

उत्तर:

(ग) निवसन्तम्

**(ii)** अलीकम् एतत् कथनम्।

(क) असत्यम्

(ख) अदृश्यम्

(ग) अलौकिकं

(घ) दर्शणीयम्

उत्तर:

(क) असत्यम्

**(iii)** आर्यस्य प्रसादेन अखण्डिता मे वणिज्या।

(क) निर्बाधा

(ख) वर्धिताः

(ग) समाप्ता

(घ) वृद्धिः

उत्तर:

(क) निर्बाधा

**(iv)** एषः एव ते निश्चयः।

(क) त्वम्

(ख) त्वयि

(ग) तव

(घ) त्वत्

उत्तर:

(ग) तव

**(v)** बाढम्, एषः एव में निश्चयः।

(क) अहम्

(ख) उचितम्

(ग) शुद्धम्

(घ) सत्यम्

उत्तर:

(क) अहम्

**VI.** पर्यायपदानि/विलोमपदानि

**प्रश्न 1.**

अधोलिखितपदानां पर्यायपदानि लिखत

अलीकम्, अनार्येण, परिक्लेशः, गेहे

**उत्तर:**

अलीकम् — असत्यम्, मृषा।

अनार्येण — दुष्टेन, दुर्जनेन।

परिक्लेशः — दुःखम्, कष्टम्।

गेहे — गृहे, सदने।

दुष्करम् — कठिनम्, दुसाध्यम्।

**प्रश्न 2.**

अधोदत्तमञ्जूषातः समुचितपदानि गृहीत्वा विलोमपदानि लिखत

आदरः, सत्यं, सन्तम्, पुण्यं, अनार्येण

पदानि — विलोमपदानि

(i) पापं — …………

(ii) आर्येण — …………

(iii) मृषा — …………

(iv) असन्तम् — …………

(v) निरादरः — …………

**उत्तर:**

पदानि — विलोमपदानि

(i) पापं — पुण्यम्

(ii) आर्येण — अनार्येण

(iii) मृषा — सत्यम्

(iv) असन्तम् — सन्तम्

(v) निरादरः — आदर:

NCERT Solutions for Class 10 Sanskrit Shemushi Chapter 11

# Chapterwise NCERT Solutions for Class 10 Sanskrit (Shemushi) :


- Chapter 1: शुचिपर्यावरणम्
- Chapter 2-बुद्धिर्बलवती सदा
- Chapter 3-व्यायामः सर्वदा पथ्यः
- Chapter 4-शिशुलालनम्
- Chapter 5-जननी तुल्यवत्सला
- Chapter 6-सुभाषितानि
- Chapter 7-सौहार्दं प्रकृतेः शोभा
- Chapter 8-विचित्रः साक्षी
- Chapter 9-सूक्तयः
- Chapter 10-भूकंपविभीषिका
- Chapter 11-प्राणेभ्योऽपि प्रियः सुहृद्
- Chapter 12-अनयोक्त्य

# About NCERT

The National Council of Educational Research and Training is an autonomous organization of the Government of India which was established in 1961 as a literary, scientific, and charitable Society under the Societies Registration Act. The major objectives of NCERT and its constituent units are to: undertake, promote and coordinate research in areas related to school education; prepare and publish model textbooks, supplementary material, newsletters, journals and develop educational kits, multimedia digital materials, etc.Organise pre-service and in-service training of teachers; develop and disseminate innovative educational techniques and practices;collaborate and network with state educational departments, universities, NGOs and other educational institutions; act as a clearing house for ideas and information in matters related to school education; and act as a nodal agency for achieving the goals of Universalisation of Elementary Education.In addition to research, development, training, extension, publication and dissemination activities, NCERT is an implementation agency for bilateral cultural exchange programmes with other countries in the field of school education.Its headquarters are located at Sri Aurobindo Marg in New Delhi. Visit the Official NCERT website to learn more.